श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

अभिरामवरगुरुभिः अनुगृहीता

# ॥ नक्षत्रमालिका ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नक्षत्रमालिका ॥

अस्मासु वत्सलतया कृपया च भूयः
    स्वेच्छावतीर्णमिव सौम्यवरं मुनीन्द्रम्।
आचार्यपौत्रमभिरामवराभिधानम्
    अस्मद्गुरुं परमकारुणिकं नमामि॥

श्रीमान् पराङ्कुशमुनिर्जीयात् यज्ज्ञानमुद्रया।
नेन्द्रियाश्वयुजो नृणां नित्यं विषयवीथयः॥ 1॥

यदुरसि भरणीया स्त्रग्विकसितवकुळानद्धा।
स जयति महिमा नाथो मुररिपुपदसक्तो नः॥ 2॥

नन्तानन्ताङ्घ्रिनलिनयुग्मे
    कर्ता लोकार्तिकबलनानाम्।
भद्राय द्राविडनिगमानां
    द्रष्टा पुष्टाय वकुळभृत्स्यात्॥ 3॥

स्यादेव सा मे फणितिश्शठारेः
    ययोदितोच्चैः सरणिर्जनानाम्।
आरोहिणी नाप्यवरोहिणी हि
    वेदोदिता तु द्वयमभ्युपैति॥ 4॥

तिलकमाह न काचिदपि श्रुतौ
    त्रिजगतामृगशीर्षसमुत्थिता।

स्फुटतरं वकुळाभरणीयवाक्
    पुरुषमादिमशेषपदैरपि ॥ 5 ॥

पित्रादिस्सकलविधोऽपि बन्धुवर्गः
    यस्यासीत्सरसिजवासिनीसहायः।
आविस्स्युर्घनकरुणारसावसेकैः
    आर्द्रा मे वकुळभृतः कटाक्षपाताः ॥ 6 ॥

तामाश्रयामि करुणां वकुळाभिरामां
    यासौ पुनर्वसुमतीवलयेवतीर्णा।
प्रज्ञादृशोन्मिषितया प्रथितानुभावा
    ज्योतिः परं यदनिदं तदिदं चकार ॥ 7 ॥

रचितवति रमायाः नायकस्याङ्घ्रिपुष्य -
    त्प्रणयरससुधाब्धिस्रोतसि स्वैरगाहम्।
प्रभवति कलिघर्मप्रावृषेण्याम्बुवाहे
    वकुळधरमुनीन्द्रे तापवार्ता कथं नः ॥ 8 ॥

नमज्जनस्य चित्तभित्तिभक्तिचित्रतूलिका
    भवाहिवीर्यभञ्जने नरेन्द्रमन्त्रयन्त्रणा।
प्रपन्नलोककैरवप्रसन्नचारुचन्द्रिका
    शठारिहस्तमुद्रिका हठाद्धुनोतु मे तमः ॥ 9 ॥

मनस्स्फटिकदर्पणप्रतिफलत्परब्रह्मणः
    प्रदर्शनमिवाचरन् प्रथितबोधमुद्राङ्कितः।
सतामभयशंसिता भवभयाभितप्तात्मनाम्
    अघानि शमयेत नः शठरिपोरवामः करः ॥ 10 ॥

रमयतु शठशत्रुरत्युन्नताचारयुक्तैर्जनैः
अवनतपदपद्मयुग्मोऽनुकम्पामृतांभोनिधिः।
बहुविधकृतपूर्वफल्गुन्यगाचारचिन्ताकुलं
हृदयमसदृशात्मपादारविन्दानुषङ्गान्मम॥ **11** ॥

मग्नं मानस मा स्म भूश्शठरिपोरव्याजसिद्धा दया
नौका काचन नाविकोऽपि स पुनः सन्तारकग्रामणीः।
एतेनोत्तरफल्गुनीरसपरिक्लिष्टोपभोगोर्मिकं
दुःखावर्तदुरन्तपारगमनं संसारवाराकरम्॥ **12** ॥

रत्नदीपिकायमानहस्तमुद्रिकाकृतत्रयीगिरीन्द्र -
कन्दरान्तरालगाढरूढरूढिमन्निधानसूचनेन।
द्राविडागमोपगीतिमूलसेकशीतवीतनिद्रपत्र -
दिव्यतिन्त्रिणीसमीपगेन नाथवानहं पराङ्कुशेन॥ **13** ॥

नत्या न त्यागकारी क्षणमपि चिदचित्रायकामेयकामे
छन्दश्छन्दस्स्वरूपे महसि कमलया भासमानेऽसमाने।
श्रेयः श्रेयस्विसङ्घैः परिचयसुरभिः कैसराणां सराणां
पातात्पाताद्भवाब्धौ शठरिपुरिह नो वीक्षणेन क्षणेन॥ **14** ॥

न प्रपत्तिवर्त्मनः प्रवर्तनापदानवासनानुसारि -
नव्यपेतसर्वदाजलाशयान्वयं कथं समं सरोजम्।
स्वातिकामियोगिबृन्दचित्तपद्मबद्धसौहृदानुरक्त -
रूपयोश्शठारिपादयोर्युगेन सन्नतार्तिभञ्जनेन॥ **15** ॥

नत्वा यां कुसुमायुधेषुधिरुचिव्याघातमातन्वती
शेमुष्या महतामहायि तरुणीजङ्घासु जङ्घालता।
विस्तीर्णच्छविशाखया शठरिपोर्वृत्तानुपूर्वीजुषा
जङ्घाकल्पतरुश्रिया सुरभितं चिन्तावनं मामकम्॥ **16** ॥

कनदवयवलोलशोभाभिधानापगास्रोतसः
समुदितगुरुबुद्बुदाकारसन्देहसन्दायिनोः।
ककुदधिगतमित्रभावं स्वभावाद्युगं जानुनोः
मम हृदि शठवैरिनाम्नो मुनीन्द्रस्य सन्दीव्यतु॥ **17** ॥

तुलासरणिसीमनि प्रथितरूपया हस्तिनां
करेण करभेण वा कदलिकाप्रकाण्डेन वा।
तथोपरि च पश्यतां नयनबन्धनज्येष्ठया
चमत्कृतिमती मतिश्शठरिपूरुलक्ष्म्या मम॥ **18** ॥

महः प्ररोहमञ्जरीमनोज्ञरत्नमेखला -
कलापपुष्पिता कटीतटीपटी शठद्विषः।
उरस्स्रवत्प्रभाझरीनिपातनिम्ननाभिका -
ऽवटोत्थफेनमण्डलीवितर्कमूलमेव नः॥ **19** ॥

नयनसुभगनाभीमुद्दिशन्ती शठारेः
सर इति परिभाषा ढौकते सार्थकत्वम्।
सततमितरथा नः संहता नेत्रमीनाः
कथमिह विहरेयुः कौतुकोद्रेकयुक्ताः॥ **20** ॥

तां मध्यदेशसुषमामवलोकयामि
रोमावलित्रिवलिकारुचिरां शठारेः।
रेखोत्तरा यदुपमामधिकाभिलाषा
ढौकेत वा यदि न वा वटपत्रशोभा॥ **21** ॥

भासा न व्यतिभिदुरीभवन्ति भृङ्गाः
हारस्थादुरसि हरिन्मणेश्शठारेः।
आरूढा वकुळमयीं स्रजं सुगन्धिं
शब्देन श्रवणसुखेन यान्ति भेदम्॥ **22** ॥

दमवतः कुरुते मदनोद्धतान्
सुघटयत्यबुधान् बुधनिष्ठया।
प्रथितमुद्रमनिद्रसरोरुह -
प्रणयि पाणितलं शठजिन्मुनेः ॥ **23** ॥

नेह संसरणरोगसंहृतिः
जायते शतभिषक्चिकित्सया।
अन्तरेण शठवैरिकन्धरा -
लंबमानवकुळस्रजां रजः ॥ **24** ॥

जन्मध्वंसं दिशति जनानां
वक्त्रं दीप्रोष्ठपदमनोज्ञम्।
मन्दस्मेरं मधुरकटाक्षं
सुभ्रूरेखं सुभगकपोलम् ॥ **25** ॥

लसति हि भजतां भद्रोत्तरपदकरणारूढम्।
शठरिपुमकुटं भासा परिहृतदुरितध्वान्तम् ॥ **26** ॥

अन्तरेण शठारातिं कस्संसारेवतीह नः।
तदहं हृदये नित्यं निदधे तद्वपुश्श्रियम् ॥ **27** ॥

वाचिकी वरिवस्या मे तारकामालिकात्मिका।
पराङ्कुशपदाब्जेन परिष्कारवती भवेत् ॥ **28** ॥

॥ इति नक्षत्रमालिका समाप्ता ॥